॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

तृतीयकाण्डे चतुर्थः प्रश्नः

इष्टिहोमाभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

वि वा ए॒तस्य॑ य॒ज्ञ ऋ॑द्ध्यते॒ यस्य॑ ह॒विर॑ति॒रिच्य॑ते॒ सूर्यो᳚ दे॒वो दि॑वि॒षद्भ्य॒ इत्या॑ह॒ बृह॒स्पति॑ना
चै॒वास्य॑ प्र॒जाप॑तिना च य॒ज्ञस्य॒ व्यृ॑द्ध॒मपि॑ वपति॒ रख्षा॑ꣳसि॒ वा ए॒तत् प॒शुꣳ स॑चन्ते॒ यदे॑कदेव॒त्य॑
आ॒ल॑ब्धो॒ भू॒यान् भव॑ति॒ यस्या᳚स्ते॒ हरि॑तो॒ गर्भ॒ इत्या॑ह दे॒वत्रै॒वैना᳚ङ्गमयति॒ रख्ष॑सा॒मप॑हत्या॒ आ
व॑र्तन वर्त॒येत्या॑ह॒ ॥ [१] ॥ ब्रह्म॑णै॒वैन॒मा व॑र्तयति॒ वि ते॑ भिनद्मि तक॒रीमित्या॑ह यथा य॒जुरे॒-
वैत॑दुरु॒द्रप्सो वि॒श्वरू॑प॒ इन्दु॒रित्या॑ह प्र॒जा वै प॒शव॒ इन्दु॑ः प्र॒जयै॒वैन॑म्प॒शुभि॒ः सम॑र्द्धयति॒ दि॒वँव्वै᳚
य॒ज्ञस्य॒ व्यृ॑द्धङ्गच्छति पृथि॒वीमति॑रिक्त॒न्तद्यन्न श॒मये॒दार्ति॒मार्च्छे᳚द्यज॑मानो म॒ही द्यौः पृ॑थि॒वी च॑ न॒
इत्या॑ ॥ [२] ॥ ह॒ द्यावा॑पृथि॒वीभ्या॑मे॒व य॒ज्ञस्य॒ व्यृ॑द्ध॒ञ्चाति॑रिक्तञ्च शमयति॒ नाऽऽ*र्ति॒मार्च्छ॑ति॒
यज॑मानो॒ भस्म॑ना॒ऽभि समू॑हति स्व॒गाकृ॑त्या॒ अथो॑ अ॒नयो॒र् वा ए॒ष गर्भो॒ऽनयो॑रे॒वैन॑न्दधाति॒ यद्॑-
व॒द्येद॒ति तद् रे॑चये॒द् यन्ना॑व॒द्येत् प॒शोराल॑ब्धस्य॒ नाऽव॑ द्येत् पु॒रस्ता॒न्नाभ्या॑ अ॒न्यद॑व॒द्येदु॒परि॑ष्टा-
द॒न्यत् पु॒रस्ता॒द्धै नाभ्यै᳚ ॥ [३] ॥ प्रा॒ण उ॒परि॑ष्टादपा॒नो यावा॑ने॒व प॒शुस्तस्याव॑ द्य॒ति विष्ण॑वे
शि॒पिवि॒ष्टाय॑ जुहोति॒ यद्वै य॒ज्ञस्याति॑रि॒च्यते॒ यः प॒शोर् भू॒मा या पु॒ष्टिस्तद् विष्णु॑ः शिपिवि॒ष्टोऽति॑-
रिक्त ए॒वाति॑रिक्तं द॒धात्यति॑रिक्तस्य॒ शान्त्या॑ अ॒ष्टाप्रू॒ड्ढिर॑ण्य॒न्दख्षि॑णा॒ऽष्टाप॑दी॒ ह्ये॑षाऽऽत्मा नव॒मः
प॒शोरा॒प्त्या॑ अन्तरको॒श उ॒ष्णीषे॒णाऽऽ*विष्टितम्भवत्ये॒वमि॑व॒ हि प॒शुरुल्ँ᳚मिव॒ चर्मै᳚व मा॒ꣳस-
मि॒वास्थी᳚व॒ यावा॑ने॒व प॒शुस्तमा॒प्त्वाऽव॑ रुन्धे॒ यस्यै॒षा य॒ज्ञे प्राय॑श्चित्तिः क्रि॒यत॑ इ॒ष्ट्वा वसी॑यान्
भव॑ति ॥ [४] ॥

(वर्तयेत्याह न इति वै नाभ्या उलꣳमिवै कविꣳशतिश्च) ॥ १ ॥

आ वायो भूष शुचिपा उप नः सहस्रन्ते नियुतो विश्ववार। उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम्॥ आकूत्यै त्वा कामाय त्वा समृधे त्वा किक्किटा ते मनः प्रजापतये स्वाहा किक्किटा ते प्राणव्ँवायवे स्वाहा किक्किटा ते चक्षुः सूर्याय स्वाहा किक्किटा ते श्रोत्रन्द्यावापृथिवीभ्याꣳ स्वाहा किक्किटा ते वाचꣳ सरस्वत्यै स्वाहा ॥ [५] ॥ त्वन्तुरीया वशिनी वशाऽसि सकृद् यत् त्वा मनसा गर्भ आऽशयत्। वशा त्वव्ँवशिनी गच्छ देवान्थ्सत्याः सन्तु यजमानस्य कामाः॥ अजाऽसि रयिष्ठा पृथिव्याꣳ सीदोर्द्ध्वाऽन्तरिक्षमुप तिष्ठस्व दिवि ते बृहद् भाः॥ तन्तुन्तन्वन् रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान्॥ अनुल्ꣳणव्ँवयत जोगुवामपो मनुर् भव जनया दैव्यञ्जनम्॥ मनसो हविरसि प्रजापतेर् वर्णो गात्राणान्ते गात्रभाजो भूयास्म ॥ [६] ॥

(सरस्वत्यै स्वाहा मनु स्त्रयोदश च) ॥ २ ॥

इमे वै सहाऽऽ*स्तान्ते वायुर्व्यवात् ते गर्भमदधातान्तꣳ सोमः प्राजनयदग्निरग्रसत स एतम्प्रजापतिराग्नेयमष्टाकपालमपश्यत् तन्निरवपत् तेनैवैनामग्नेरधि निरक्रीणात् तस्मादप्यन्यदेवत्यामालभमान आग्नेयमष्टाकपालम्पुरस्तान्निर्वपेदग्नेरेवैनामधि निष्क्रीयाऽऽलभते यद् ॥ [७] ॥ वायुर् व्यवात् तस्माद्वायव्या यदिमे गर्भमदधातान्तस्माद्द्यावापृथिव्या यथ् सोमः प्राजनयदग्निरग्रसत तस्मादग्नीषोमीया यदनयोर् वियत्योर् वागवदत् तस्माथ् सारस्वती यत् प्रजापतिरग्नेरधि निरक्रीणात् तस्मात् प्राजापत्या सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामा लभेत भूतिकामो वायुर् वै क्षेपिष्ठा देवता वायुमेव स्वेन ॥ [८] ॥ भागधेयेनोप धावति स एवैनम्भूतिङ्गमयति द्यावापृथिव्यामा लभेत कृषमाणः प्रतिष्ठाकामो दिव एवास्मै पर्जन्यो वर्षति व्यस्यामोषधयो रोहन्ति समर्द्धुकमस्य सस्यम्भवत्यग्नीषोमीयामा लभेत यः कामयेतान्नवानन्नादः स्यामित्यग्निनैवान्नमव रुन्धे सोमेनान्नाद्यमन्नवानेवान्नादो भवति सारस्वतीमा

लभेत य ॥ [९] ॥ ईश्वरो वाचो वदितोः सन् वाचन्न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन् वाचन्दधाति प्राजापत्यामा लभेत यः कामयेतानभिजितमभि जयेयमिति प्रजापतिः सर्वा देवता देवताभिरेवानभिजितमभि जयति वायव्ययोपाकरोति वायो-रेवैनामवरुद्ध्याऽऽलभत आकूत्यै त्वा कामाय त्वे ॥ [१०] ॥ त्याह यथायजुरेवैतत् किंक्कि-टाकारञ्जुहोति किंक्किटाकारेण वै ग्राम्याः पशवो रमन्ते प्राऽऽ*रण्याः पतन्ति यत् किंक्किटाका-रञ्जुहोति ग्राम्याणाम्पशूनान्धृत्यै पर्यग्नौ क्रियमाणे जुहोति जीवन्तीमेवैनां॒ सुवर्गँल्लोकङ्गमयति त्वन्तुरीया वशिनी वशाऽसीत्याह देवत्रैवैनां गमयति सत्याः सन्तु यजमानस्य कामा इत्याहैष वै कामो ॥ [११] ॥ यजमानस्य यदनार्त उद्दचङ्गच्छति तस्मादेवमाहाऽजाऽसि रयिष्ठेत्या-हैष्वेवैनाँल्लोकेषु प्रति ष्ठापयति दिवि ते बृहद् भा इत्याह सुवर्ग एवास्मै लोके ज्योतिर् दधाति तन्तुन्तन्वन् रजसो भानुमन्विहीत्याहेमानेवास्मै लोकान् ज्योतिष्मतः करोत्यनुल्बणँव्वयत जोगुवामप इत्या ॥ [१२] ॥ ह यदेव यज्ञ उल्बणङ्क्रियते तस्यैवैषा शान्तिर् मनुर् भव जनया दैव्यञ्जनमित्याह मानव्यो वै प्रजास्ता एवाऽऽ*द्याः कुरुते मनसो हविरसीत्याह स्वगाकृत्यै गात्राणान्ते गात्रभाजो भूयास्मेत्याहाऽऽ*शिषमेवैतामा शास्ते तस्यै वा एतस्या एकमेवादेवय-जनं यदालब्धायामभ्रो ॥ [१३] ॥ भवति यदालब्धायामभ्रः स्यादप्सु वा प्रवेशयेथ् सर्वाँव्वा प्राश्नीयाद् यदप्सु प्रवेशयेद् यज्ञवेशसङ्कुर्याथ् सर्वामेव प्राश्नीयादिन्द्रियमेवाऽऽ*त्मन् धत्त सा वा एषा त्रयाणामेवाव रुद्धा सँव्वथ्सरसदः सहस्रयाजिनो गृहमेधिनस्त एवैतया यजेरन् तेषामेवैषाऽऽप्ता ॥ [१४] ॥

(यथ् स्वेन सारस्वतीमा लभेत यः कामाय त्वा कामो ऽप इत्य भ्रो द्विचत्वारिं॒शच्च) ॥ ३ ॥

चित्तञ्च चित्तिश्चाऽऽ*कूतञ्चाऽऽ*कूतिश्च विज्ञातञ्च विज्ञानञ्च मनश्च शक्करीश्च दर्शश्च पूर्ण-मासश्च बृहच्च रथन्तरञ्च प्रजापतिर् जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव देवासुराः सँय्यत्ता आसन्थ् स इन्द्रः प्रजाप-तिमुपाऽ धावत् तस्मा एताञ्जयान् प्रायच्छत् तानजुहोत् ततो वै देवा असुरानजयन्यदजयन् तज्जयानाञ्जयत्वङ्ँ स्पर्द्धमानेनैते होतव्या जयत्येव ताम्पृतनाम् ॥ [१५] ॥

(उप पञ्चविꣳशतिश्च) ॥ ४ ॥

अग्निर् भूतानामधिपतिः स माऽवत्विन्द्रो ज्येष्ठानाँय्यँमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणाम्बृहस्पतिर् ब्रह्मणो मित्रः सत्यानाँव्वँरुणोऽपाꣳ समुद्रः स्रोत्यानामन्नꣳ साम्राज्यानामधिपति तन्माऽवतु सोम ओषधीनाꣳ सविता प्रसवानाꣳ रुद्रः पशूनान्त्वष्टा रूपाणाँव्विँष्णुः पर्वतानाम्मरुतो गणानामधिपतयस्ते माऽवन्तु पितरः पितामहाः परेऽवरे ततास्ततामहा इह माऽवत। अस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्याम्पुरोधायामस्मिन्कर्मन्नस्यान्देवहूत्याम् ॥ [१६] ॥

(अवरे सप्तदश च) ॥ ५ ॥

देवा वै यद् यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एतानभ्यातानानपश्यन् तानभ्यातन्वत यद् देवानाङ्कर्माऽऽ*सीदार्ध्यत तद् यदसुराणान्न तदार्ध्यत येन कर्मणेर्त्सेत् तत्र होतव्या ऋध्नोत्येव तेन कर्मणा यद् विश्वे देवाः समभरन् तस्मादभ्यातानाः वैश्वदेवा यत् प्रजापतिर् जयान् प्रायच्छत् तस्माज्जयाः प्राजापत्या ॥ [१७] ॥ यद्राष्ट्रभृद्भी राष्ट्रमाऽददत तद्राष्ट्रभृताꣳ राष्ट्रभृत्त्वन्ते देवा अभ्यातानैरसुरानभ्यातन्वत जयैरजयन् राष्ट्रभृद्भी राष्ट्रमाऽददत यद्देवा अभ्यातानैरसुरानभ्यातन्वत तदभ्यातानाना मभ्यातानत्वयँय्यज्जयैरजयन् तज्जयानाञ्जयत्वयँय्यद्राष्ट्रभृद्भी राष्ट्रमाऽददत तद्राष्ट्रभृताꣳ राष्ट्रभृत्त्वन्ततो देवा अभवन् पराऽसुरा यो भ्रातृव्यवान्थ् स्याथ् स एतान् जुहुयादभ्यातानैरेव भ्रातृव्यानभ्यातनुते जयैर् जयति राष्ट्रभृद्भी राष्ट्रमा दत्ते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ॥ [१८] ॥

(प्राजापत्याः सोऽष्टा दश च) ॥ ६ ॥

ऋताषाड् ऋतधामाऽग्निर् गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदम्ब्रह्म क्षत्रम्पातु ता इदम्ब्रह्म क्षत्रम्पान्तु तस्मै स्वाहा ताभ्यः स्वाहा सꣳहितो विश्वसामा सूर्यो गन्धर्व

स्तस्य मरीचयोऽप्सरस आयुवः सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः स्तवाः प्रजापतिर् विश्वकर्मा मनो ॥ [१९] ॥ गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गन्धर्वस्त-स्याऽऽ*पोऽप्सरसो मुदा भुवनस्य पते यस्य त उपरि गृहा इह च। स नो रास्वाज्यानिं रायस्पोषं सुवीर्यं सँव्वथ्सरीणाꣳ स्वस्तिम्॥ परमेष्ठ्यधिपतिर् मृत्युर् गन्धर्वस्तस्य विश्व-मप्सरसो भुवः सुक्षितिः सुभूतिर् भद्रकृथ् सुवर्वान् पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचो दूरेहेतिरमृडयो ॥ [२०] ॥ मृत्युर् गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवश्चारुः कृपण-काशी कामो गन्धर्व स्तस्याधयोऽप्सरसः शोचयन्तीर् नाम स इदम्ब्रह्म क्षत्रम्पातु ता इदम्ब्रह्म क्षत्रम्पान्तु तस्मै स्वाहा ताभ्यः स्वाहा स नो भुवनस्य पते यस्य त उपरि गृहा इह च। उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ ॥ [२१] ॥

(मनो ऽमृडयः षट्चत्वारिꣳशच्च) ॥ ७ ॥

राष्ट्रकामाय होतव्या राष्ट्रँव्वै राष्ट्रभृतो राष्ट्रेणैवास्मै राष्ट्रमव रुन्धे राष्ट्रमेव भवत्यात्मने होतव्या राष्ट्रँव्वै राष्ट्रभृतो राष्ट्रम्प्रजा राष्ट्रम्पशवो राष्ट्रँय्यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमव रुन्धे वसिष्ठः समा-नानाम्भवति ग्रामकामाय होतव्या राष्ट्रँव्वै राष्ट्रभृतो राष्ट्रꣳ सजाता राष्ट्रेणैवास्मै राष्ट्रꣳ सजातानव रुन्धे ग्राम्ये ॥ [२२] ॥ व भवत्यधिदेवने जुहोत्यधिदेवन एवास्मै सजातानव रुन्धे त एन-मवरुद्धा उप तिष्ठन्ते रथमुख ओजस्कामस्य होतव्या ओजो वै राष्ट्रभृत ओजो रथ ओजसै-वास्मा ओजोऽव रुन्ध ओजस्व्येव भवति यो राष्ट्रादपभूतः स्यात् तस्मै होतव्या यावन्तोऽस्य रथाः स्युस्तान् ब्रूयाद् युङ्ध्वमिति राष्ट्रमेवास्मै युनक्त्या ॥ [२३] ॥ हुतयो वा एतस्याक्लृप्ता यस्य राष्ट्रन्न कल्पते स्वरथस्य दक्षिणञ्चक्रम्प्रवृह्य नाडीमभि जुहुयादाहुतीरेवास्य कल्पयति ता अस्य कल्पमाना राष्ट्रमनु कल्पते संग्रामे सँय्यत्ते होतव्या राष्ट्रँव्वै राष्ट्रभृतो राष्ट्रे खलु वा एते व्यायच्छन्ते ये सङ्ग्रामꣳ सँय्यन्ति यस्य पूर्वस्य जुह्वति स एव भवति जयति तꣳ संग्राममम्मा-न्धुक इद्ध्मो ॥ [२४] ॥ भवत्यङ्गारा एव प्रतिवेष्टमाना अमित्राणामस्य सेनाम्प्रति वेष्टयन्ति य उन्माद्येत् तस्मै होतव्या गन्धर्वाप्सरसो वा एतमुन्मादयन्ति य उन्माद्यत्येते खलु वै गन्ध-

वाप्सरसो यद्राष्ट्रभृतस्तस्मै स्वाहा ताभ्यः स्वाहेति जुहोति तेनैवैनाञ्छमयति नैयग्रोध औदुंबर आश्वत्थः प्लाक्ष इतीद्ध्मो भवत्येते वै गन्धर्वाप्सरसाङ्गृहाः स्व एवैना ॥ [२५] ॥ नायतने शमयत्यभिचरता प्रतिलोमꣳ होतव्याः प्राणानेवास्य प्रतीचः प्रति यौति तन्ततो येन केन च स्तृणुते स्वकृत इरिणे जुहोति प्रदरे वैतद्वा अस्यै निरृतिगृहीतन्निरृतिगृहीत एवैनन्निरृत्या ग्राहयति यद्वाचः क्रूरन्तेन वषट् करोति वाच एवैनङ्क्रूरेण प्र वृश्चति ताजगार्तिमार्च्छति यस्य कामयेतान्नाद्य ॥ [२६] ॥ मा ददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि सङ्गृह्णीयात् प्रजापतिर् वै भुवनस्य पतिः प्रजापतिनैवास्यान्नाद्यमा दत्त इदमहममुष्याऽऽ*मुष्या-यणस्यान्नाद्यꣳ हरामीत्याहान्नाद्यमेवास्य हरति षड्भिर्हरति षड्वा ऋतवः प्रजापतिनैवास्या न्नाद्य-मादायर्तवोऽस्मा अनु प्र यच्छन्ति ॥ [२७] ॥ यो ज्येष्ठबन्धुरप भूतः स्यात् तꣳ स्थलेऽवसाय्य ब्रह्मौदनञ्चतुश्शरावम्पक्त्वा तस्मै होतव्या वर्ष्म वै राष्ट्रभृतो वर्ष्म स्थलँव्वर्ष्मणैवैनँव्वर्ष्म समा-नानाङ्गमयति चतुश्शरावो भवति दिख्ष्वेव प्रति तिष्ठति ख्षीरे भवति रुचमेवास्मिन् दधात्यु-द्धरति शृतत्वाय सर्पिष्वान् भवति मेद्ध्यत्वाय चत्वार आर्षेयाः प्राश्ञन्ति दिशामेव ज्योतिषि जुहोति ॥ [२८] ॥

(ग्रामी युनक्ती द्ध्मः स्व एवैनान्नाद्यंयच्छन्त्येकान्नपञ्चाशच्च) ॥ ८ ॥

⋆

देविका निर्वपेत् प्रजाकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै प्रजाश्छन्दोभिरेवास्मै प्रजाः प्र जनयति प्रथमन्धातारङ्करोति मिथुनी एव तेन करोत्यन्वेवास्मा अनुमतिर् मन्यते राते राका प्र सिनीवाली जनयति प्रजास्वेव प्रजातासु कुह्वा वाचन्दधात्येता एव निर्वपेत् पशुका-मश्छन्दाꣳसि वै देविकाश्छन्दाꣳसी ॥ [२९] ॥ व खलु वै पशवश्छन्दोभिरेवास्मै पशून् प्र जनयति प्रथमन्धातारङ्करोति प्रैव तेन वापयत्यन्वेवास्मा अनुमतिर्मन्यते राते राका प्र सिनी-वाली जनयति पशूनेव प्रजातान् कुह्वा प्रति ष्ठापयत्येता एव निर्वपेद्ग्रामकामश्छन्दाꣳसि वै देवि-काश्छन्दाꣳसीव खलु वै ग्रामश्छन्दोभिरेवास्मै ग्राम ॥ [३०] ॥ मव रुन्धे मद्ध्यतो धाता-रङ्करोति मद्ध्यत एवैनङ्ग्रामस्य दधात्येता एव निर्वपेज्ज्योगामयावी छन्दाꣳसि वै देविकाश्छ-न्दाꣳसि खलु वा एतमभि मन्यन्ते यस्य ज्योगामयति छन्दोभिरेवैनमगदङ्करोति मद्ध्यतो

धातारङ्करोति मद्ध्यतो वा एतस्याक्लृप्तय्यँस्य ज्योगामयति मद्ध्यत एवास्य तेन कल्पयत्येता एव निर् ॥ [३१] ॥ वपेद्यय्यँज्ञो नोपनमेच्छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा एतन्नोप नमन्ति यय्यँज्ञो नोपनमति प्रथमन्धातारङ्करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनय्यँज्ञो नमत्येता एव निर्वपेदीजानश्छन्दाꣳसि वै देविका यातयामानीव खलु वा एतस्य छन्दाꣳसि य ईजान उत्तमन्धातारङ्करो ॥ [३२] ॥ त्युपरिष्टादेवास्मै छन्दाꣳस्ययातयामान्यव रुन्ध उपै-नमुत्तरो यज्ञो नमत्येता एव निर्वपेद्यम्मेधा नोपनमेच्छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा एतन्नोप नमन्ति यम्मेधा नोपनमति प्रथमन्धातारङ्करोति मुखत एवास्मै छन्दाꣳसि दधात्युपै-नम्मेधा नमत्येता एव निर्वपे ॥ [३३] ॥ द्रुक्कामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै रुक् छन्दोभिरेवास्मिन् रुचन्दधाति ख्षीरे भवन्ति रुचमेवास्मिन् दधति मद्ध्यतो धातारङ्क-रोति मद्ध्यत एवैनꣳ रुचो दधाति गायत्री वा अनुमतिस्त्रिष्टुग्राका जगती सिनीवाल्यनुष्टुप् कुहूर् धाता वषट्कारः पूर्वपख्षो राकाऽपरपख्षः कुहूरमावास्या सिनीवाली पौर्णमास्यनुमति श्चन्द्र-माधाताऽष्टौ ॥ [३४] ॥ वसवोऽष्टाख्षरा गायत्र्येकादश रुद्रा एकादशाख्षरा त्रिष्टुब् द्वाद-शाऽऽ*दित्या द्वादशाख्षरा जगती प्रजापतिरनुष्टुब् धाता वषट्कार एतद्वै देविकाः सर्वाणि च छन्दाꣳसि सर्वाश्च देवता वषट्कारस्ता यथ् सह सर्वा निर्वपेदीश्वरा एनम्प्रदहो द्वे प्रथमे निरुप्य धातुस्तृतीयन्निर्वपेत् तथो एवोत्तरे निर्वपेत् तथैनन्न प्र दहन्त्य थो यस्मै कामाय निरुप्यन्ते तमे-वाऽऽ*भिरुपाऽऽ*प्नोति ॥ [३५] ॥

(पशुकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसि ग्रामं कल्पयत्येता एव नि रुत्तमन्धातारङ्करोति मेधा नमत्येता एव निर्वपे द्रष्टौ दहन्ति नव च) ॥ ९ ॥

अनुवाक ९ विशेषः (देविकाः प्रजाकामो मिथुनी पशुकामः प्रैव ग्रामकामो ज्योगामयावी यय्यँज्ञो य ईजानो यं मेधा रुक्कामोऽष्टौ॥ देविका भवन्ति दधति राष्ट्रकामाय भवति दधाति॥)

वास्तोष्पते प्रति जानी ह्यस्मान्थ् स्वावेशो अनमीवो भवा नः। यत् त्वेमहे प्रति तन्नो जुषस्व शन्न एधि द्विपदे शञ्चतुष्पदे॥ वास्तोष्पते शग्मया सꣳसदा ते सख्षीमहि रण्वया गातुमत्या। आवः ख्षेम उत योगे वरन्नो यूयम्पात स्वस्तिभिः सदा नः॥ यथ् सायंप्रातरग्निहोत्रञ्जुहोत्या-हुतीष्टका एव ता उप धत्ते ॥ [३६] ॥ यजमानोऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्

यथ् सायंप्रातर् जुहोत्यहोरात्राण्येवाऽऽस्वेष्टकाः कृत्वोप धत्ते दश समानत्र जुहोति दशाक्षरा विराड् विराजमेवाऽऽस्वेष्टकाङ्कृत्वोप धत्तेऽथो विराज्येव यज्ञमाप्नोति चित्यश्चित्योऽस्य भवति तस्माद् यत्र दशोषित्वा प्रयाति तद्यज्ञवास्त्ववास्त्वेव तद् यत् ततोऽर्वाचीनꣳ ॥ [३७] ॥ रुद्रः खलु वै वास्तोष्पतिर् यदहुत्वा वास्तोष्पतीयम्प्रयायाद् रुद्र एनम्भूत्वाऽग्निरनूत्थाय हन्याद् वास्तोष्पतीयञ्जुहोति भागधेयेनैवैनꣳ शमयति नाऽऽर्तिमार्च्छति यजमानो यद्युक्ते जुहुयाद् यथा प्रयाते वास्तावाहुतिञ्जुहोति तादृगेव तद् यदयुक्ते जुहुयाद् यथा क्षेम आहुतिञ्जुहोति तादृगेव तदहुतमस्य वास्तोष्पतीयꣳ स्याद् ॥ [३८] ॥ दक्षिणो युक्तो भवति सव्योऽयुक्तोऽथ वास्तोष्पतीयञ्जुहोत्युभयमेवाऽ करपरिवर्गमे वैनꣳ शमयति यदेकया जुहुयाद् दर्विहोमङ्कुर्यात् पुरोनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वाय यद्धुत आदद्ध्याद् रुद्रङ्गृहानन्वारोहयेद्यदव-क्षाणान्यसंप्रक्षाप्य प्रयायाद् यथा यज्ञवेशसꣳवाऽऽदहनꣳवा तादृगेव तदयन्ते योनिर्ऋत्विय इत्यरण्योः समारोहय ॥ [३९] ॥ त्येष वा अग्नेर् योनिः स्व एवैनꣳयोनौ समारोहयत्यथो खल्वाहुर् यदरण्योः समारूढो नश्येदुदस्याग्निः सीदेत् पुनराधेयः स्यादिति या ते अग्ने यज्ञिया तनूस्तयेह्या रोहेत्यात्मन्थ् समारोहयते यजमानो वा अग्नेर् योनिः स्वायामेवैनꣳयोन्याꣳ समा-रोहयते ॥ [४०] ॥

(धत्ते ऽर्वाचीनꣳ स्याथ् समारोहयति पञ्चचत्वारिꣳशच्च) ॥ १० ॥

त्वमग्ने बृहद् वयो दधासि देव दाशुषे। कविर् गृहपतिर् युवा॥ हव्यवाडग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे। सुगार्हपत्याः समिषो दिदीह्यस्मद्रियख् सम्मिमीहि श्रवाꣳसि॥ त्वञ्च सोम नो वशो जीवातुन्न मरामहे। प्रियस्तोत्रो वनस्पतिः॥ ब्रह्मा देवानाम्पदवीः कवी-नामृषिर् विप्राणाम्महिषो मृगाणाम्। श्येनो गृध्राणाꣳ स्वधितिर् वनानाꣳ सोमः ॥ [४१] ॥ पवित्रमत्येति रेभन्न्॥ आ विश्वदेवꣳ सत्पतिꣳ सूक्तैरद्या वृणीमहे। सत्यसवꣳ सवितारम्॥ आ सत्येन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च। हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन्न्॥ यथा नो अदितिः करत् पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियम्॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा ॥ [४२] ॥ नो अश्वेषु रीरिषः। वीरान् मा नो रुद्र भामितो

वधीरृहविष्मन्तो नमसा विधेम ते॥ उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः। गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन्न्॥ हꣳसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन्न्। बृहस्पतिरभिकनिक्रदद् गा उत प्रास्तौदुच्च विद्वाꣳ अगायत्॥ एन्द्र सानसिꣳ रयिꣳ ॥ [४३] ॥ सजित्वानꣳ सदासहम्। वर्षिष्ठमूतये भर॥ प्र ससाहिषे पुरुहूत शत्रून् ज्येष्ठस्ते शुष्म इह रातिरस्तु। इन्द्राऽऽभर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम्॥ त्वꣳ सुतस्य पीतये सद्यो वृद्धो अजायथाः। इन्द्र ज्यैष्ठ्याय सुक्रतो॥ भुवस्त्वमिन्द्र ब्रह्मणा महान् भुवो विश्वेषु सवनेषु यज्ञियः। भुवोनृꣳश्च्यत्नो विश्वस्मिन् भरे ज्येष्ठश्च मन्त्रो ॥ [४४] ॥ विश्वचर्षणे॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम्। सत्यञ्चित्रश्रवस्तमम्॥ मित्रो जनान् यातयति प्रजानन् मित्रो दाधार पृथिवीमुत द्याम्। मित्रः कृष्टीरनिमिषाऽभि चष्टे सत्याय हव्यङ्घृतवद् विधेम॥ प्रसमित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन। न हन्यते न जीयते त्वातो नैनमꣳहो अश्नोत्यन्तितो न दूरात्॥ य ॥ [४५] ॥ च्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्। मिनीमसि द्यविद्यवि॥ यत् किञ्चेदँवरुण दैव्ये जनेऽभिद्रोहम्मनुष्याँश्चरा-मसि। अचित्ती यत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः॥ कितवासो यद् रिरिपुर् न दीवि यद् वा घा सत्यमुतयन्न विद्म। सर्वा ता वि ष्य शिथिरे व दवाऽथा ते स्याम वरुण प्रियासः ॥ [४६] ॥

(सोमो गोषु मा रयिं मन्त्रो य च्छिथिरा सप्त च) ॥ ११ ॥

समाप्ति कोर्वैः

(वि वा एतस्या वायो इमे वै चित्तञ्चा ऽग्निर् भूतानां देवा वा अभ्याताना नृताषाड्राष्ट्रकामाय देविका वास्तोष्पते त्वमग्ने बृह देकादश)
(वि वा एतस्येत्याह मृत्युर्गन्धर्वो ऽव रुन्धे मद्धुत स्त्वमग्ने बृहथ् षट्चत्वारिꣳशत्)
(वि वा एतस्य प्रियासः)

॥ हरिः ॐ ॥

तृतीयकाण्डे चतुर्थः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
११	४६

ॐ